# ॥ સુબાહુકૃતા દેવીસ્તુતિઃ ॥

.. Devistuti by Subahu ..

sanskritdocuments.org

August 20, 2017

# .. Devistuti by Subahu ..

# ॥ સુબાહુકૃતા દેવીસ્તુતિઃ ॥

## Sanskrit Document Information

Text title : devIstuti by Subahu

File name : devIstutisubAhu.itx

Category : devii, otherforms

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Vishwas Bhide

Proofread by : Vishwas Bhide, PSA Easwaran

Source : Devi Bhagavat Mahapurana 3.23

Acknowledge-Permission: Vishwas Bhide http://satsangdhara.net

Latest update : June 14, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ સુબાહુકૃતા દેવીસ્તુતિઃ ॥

સુબાહુરુવાચ -
નમો દેવ્યૈ જગદ્ધાત્ર્યૈ શિવાયૈ સતતં નમઃ ।
દુર્ગાયૈ ભગવત્યૈ તે કામદાયૈ નમો નમઃ ॥ ૧॥

નમઃ શિવાયૈ શાન્ત્યૈ તે વિદ્યાયૈ મોક્ષદે નમઃ ।
વિશ્વવ્યાપ્ત્યૈ જગન્માતર્જગદ્ધાત્ર્યૈ નમઃ શિવે ॥ ૨॥

નાહં ગતિં તવ ધિયા પરિચિન્તયન્ વૈ
જાનામિ દેવિ સગુણઃ કિલ નિર્ગુણાયાઃ ।
કિં સ્તૌમિ વિશ્વજનનીં પ્રકટપ્રભાવાં
ભક્તાર્તિનાશનપરાં પરમાઞ્ચ શક્તિમ્ ॥ ૩॥

વાગ્દેવતા ત્વમસિ સર્વગતૈવ બુદ્ધિ-
ર્વિદ્યા મતિશ્ચ ગતિરપ્યસિ સર્વજન્તોઃ ।
ત્વાં સ્તૌમિ કિં ત્વમસિ સર્વમનોનિયન્ત્રી
કિં સ્તૂયતે હિ સતતં ખલુ ચાત્મરૂપમ્ ॥ ૪॥

બ્રહ્મા હરશ્ચ હરિરપ્યનિશં સ્તુવન્તો
નાન્તં ગતાઃ સુરવરાઃ કિલ તે ગુણાનામ્ ।
ક્વાહં વિભેદમતિરમ્બ ગુણૈર્વૃતો વૈ
વક્તું ક્ષમસ્તવ ચરિત્રમહોઽપ્રસિદ્ધઃ ॥ ૫॥

સત્સઙ્ગતિઃ કથમહો ન કરોતિ કામં
પ્રાસઙ્ગિકાપિ વિહિતા ખલુ ચિત્તશુદ્ધિઃ ।
જામાતુરસ્ય વિહિતેન સમાગમેન
પ્રાપ્તં મયાઽદ્ભુતમિદં તવ દર્શનં વૈ ॥ ૬॥

બ્રહ્માઽપિ વાઞ્છતિ સદૈવ હરો હરિશ્ચ
સેન્દ્રાઃ સુરાશ્ચ મુનયો વિદિતાર્થતત્ત્વાઃ ।
યદ્દર્શનં જનનિ તેઽદ્ય મયા દુરાપં
પ્રાપ્તં વિના દમશમાદિસમાધિભિશ્ચ ॥ ૭॥

ક્વાહં સુમન્દમતિરાશુ તવાવલોકં
ક્વેદં ભવાનિ ભવભેષજમદ્વિતીયમ્ ।

જ્ઞાતાऽસિ દેવિ સતતં કિલ ભાવયુક્તા
    ભક્તાનુકમ્પનપરામરવર્ગપૂજ્યા ॥ ૮॥

કિં વર્ણયામિ તવ દેવિ ચરિત્રમેતદ્
    યદ્રક્ષિતોऽસ્તિ વિષમેऽત્ર સુદર્શનોऽયમ્ ।
શત્રૂ હતૌ સુબલિનૌ તરસા ત્વયાદ્ય
    ભક્તાનુકમ્પિ ચરિતં પરમં પવિત્રમ્ ॥ ૯॥

નાશ્ચર્યમેતદિતિ દેવિ વિચારિતેऽર્થે
    ત્વં પાસિ સર્વમખિલં સ્થિરજઙ્ગમં વૈ ।
ત્રાતસ્ત્વયા ચ વિનિહત્ય રિપુર્દયાતઃ
    સંરક્ષિતોऽયમધુના ધ્રુવસન્ધિસૂનુઃ ॥ ૧૦॥

ભક્તસ્ય સેવનપરસ્ય સ્વયશોऽતિદીપ્તં
    કર્તું ભવાનિ રચિતં ચરિતં ત્વયૈતત્ ।
નોચેત્કથં સુપરિગૃહ્ય સુતાં મદીયાં
    યુદ્ધે ભવેત્કુશલવાનનવદ્યશીલઃ ॥ ૧૧॥

શક્તાऽસિ જન્મમરણાદિભયાન્વિહન્તું
    કિં ચિત્રમત્ર કિલ ભક્તજનસ્ય કામમ્ ।
ત્વં ગીયસે જનનિ ભક્તજનૈરપારા
    ત્વં પાપપુણ્યરહિતા સગુણાऽગુણા ચ ॥ ૧૨॥

ત્વદ્દર્શનાદહમહો સુકૃતી કૃતાર્થો
    જાતોऽસ્મિ દેવિ ભુવનેશ્વરિ ધન્યજન્મા ।
બીજં ન તે ન ભજનં કિલ વેદ્મિ માત-
    ર્જ્ઞાતસ્તવાદ્ય મહિમા પ્રકટપ્રભાવઃ ॥ ૧૩॥

વ્યાસ ઉવાચ -
એવં સ્તુતા તદા દેવી પ્રસન્નવદના શિવા ।
ઉવાચ ચ નૃપં દેવી વરં વરય સુવ્રત ॥ ૧૪॥

ઇતિ શ્રીમદ્દેવીભાગવતમહાપુરાણે તૃતીયસ્કન્ધે
દ્વાત્રિંશોऽધ્યાયે સુબાહુકૃતા દેવીસ્તુતિઃ સમ્પૂર્ણા ।

Verse 42-55

Encoded and proofread by Vishwas Bhide, PSA Easwaran

.. Devistuti by Subahu ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*